106

CC-0. Digitized by eGangotri and MIDF- Delhi

अग्निस्थापना विधि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्था श्रीगणेशायनमः॥ ॥अथाग्निस्थापनाविधिः॥ ॥ॐ भूरसीति भूमिशोधनम्। भूरसि
१ भूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री॥ पृथिवींयच्छपृथिवीन्दृꣳ
हपृथिवीम्माहिꣳसीः॥१॥ अश्मावमेतिमृत्तिकास्थापनम्॥ अश्माचमेमृत्तिकाच
गिरयश्चमेपर्वताश्चमेसिकताश्चमेवनस्पतयश्चमेहिरण्यञ्चमेयश्चमेश्याम
ञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्पन्ताम्॥२॥ एषवस्तोमेतिदर्भंगृह्णीया
त्॥ एषवस्तोमोमरुतः इयङ्गीर्म्मान्दार्य्यस्यमान्यस्यकारोः॥ एषायासीष्टतन्वे
वयांविद्यामेषंवृजनञ्जीरदानुम्॥३॥ गद्दैवेतिपरिसमूहनंदर्भैः॥ यद्देवादेवहे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सावरस्थाऽथमकूलकः ॥ निकुंभोदंतिकाप्रत्यक्श्रेणापुदुंबरपर्णपि ॥ १४ ॥ अज
मोदातूग्रगंधाब्रह्मदर्भा यवानिका ॥ मूलेपुष्करकाश्मीरपद्मपत्राणिपौ
ष्करे ॥ अव्यथातिचरा पद्मा चारटी पद्मचारिणी ॥ कांपिल्यः कर्कशश्चंद्रो र
क्तांगो रोचनीत्यपि ॥ प्रपुन्नाटस्त्वेडगजो ददुघ्नः चक्रमर्दकः ॥ पद्माट उर
णाख्यश्च पलांडुस्तु सुकंदकः ॥ १५ ॥ लतार्कदुद्रुमौ तत्र हरितेथ महौषधं ॥ लशु
नं गृंजनारिष्टमहाकंदरसोनकाः ॥ पुनर्नवा तु शोथघ्नी वितुन्नं सुनिषण्ण
॥ स्याद्वातकः शीतलोऽपराजिता धूनपर्णपि ॥ पारावतांघ्रिः कटभी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्र॰ १५

परावाज्योतिष्मतीलता॥वार्षिकंत्रायमाणास्यात्त्रायंतीवलभद्रिका॥विष्वक्से
नप्रियागृष्टिर्वाराहीवदरेत्यपि॥मार्कवोभृंगराजःस्यात्काकमाचीतुवा
यसी॥शतपुष्पासितछत्रातिछत्रामधुरामिसिः॥अवाक्पुष्पीकारवी
चसरणातुप्रसारिणी॥तस्यांकटंभराराजवलाभद्रवलेपिच॥जनीज
तूका नीजतुकृच्चक्रवर्तिनी॥संस्पर्शाथशटीगंधमूलीषड्ग्रंथिकेत्य
पि॥कर्चूरोपिपलाशोथकारवेल्लःकटिल्लकः॥सुषवीचाथकुलकंप
टोलस्तिक्तकःपटुः॥कूष्मांडकस्तुकर्कारुरुर्वारुःकर्कटीस्त्रियौ॥इक्ष्वाकुः
कटुतुंबीस्यात्तुंब्यलावूरुभेसमे॥चित्रागवाक्षीगोडुंबाविशालात्विंद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

×गोडुंबा॰

CC-0. Digitized by eGangotri and MIDP- Delhi

वाहराी॥ अर्प्रोघ्रस्मूरगः कंदोगंडीरस्त्वसमष्टिला॥ कलंबुपोदिकास्त्री नु
मूलकैहिलमोचिका॥ वास्तूकं शाकभेदाः स्युः दुर्वा तु रातपर्विका॥ स ह
स्त्रवीर्य्याभार्गव्यौ रुहा नेता पसासिता॥ गोलोमी रातवीर्य्या व गंडाली
सकुलाक्षका॥ कुरुविंदो मेघनामा मुस्ता मुस्तक मस्त्रियां॥ स्याद्भद्र मु
स्तको गुंद्रा चूडाला चक्रलोच्चटा॥ वंशे त्वक्सारकर्मार त्वचिसार तृणध्व
जाः॥ रातपर्वा यवफलो वेणुमस्करतेजनाः॥ वेणवः कीचकास्ते स्युः ये स्व
नंत्यनिलोद्धताः॥ ग्रंथिर्न्ना पर्व परुषी गुंद्रस्तेजनकः शरः॥ नडस्तु धमनः
पोटगलो [illegible] मस्त्रियां॥ इक्षुगंधा पोटगलः पुंसि भूम्नि तु वल्वजाः॥ रसा

कास

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्री लट्टस्तड्डेदः पुण्डरीकोनारकादयः ॥ स्याद्वीररं वीरतरं मूलेस्योषीरमस्त्रियां ॥
१६ अभयं नलदं सेव्यममृणालं जलाशयं ॥ लामज्जकं लघुलयमवदाहेष्टकापथे ॥
नलादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ॥ अस्त्री कुशं कुथो दर्भः पवित्रम
थ कत्तृणं ॥ पौरसौगंधिकध्यामदेवजग्धकरौहिषं ॥ छत्रातिछत्रपालघ्नौ
मालातृणकभूस्तृणे ॥ शष्पं बालतृणं घासो यवसं तृणमर्जुनं ॥ तृणानां
संहतिस्तृण्या नड्या तु नडसंहतिः ॥ तृणराजाह्वयस्तालो नारिकेरस्तु लां १६४
गली ॥ घोंटा तु पूगः क्रमुको गुवाकः खपुरोस्य तु ॥ फलमुद्वेगमेते च हिंता रामः
लसहितास्त्रयः ॥ खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ॥ [illegible] १६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कंठीरवो मृगारिस्तु मृगदृष्टिर्मृगाशनः ॥ [illegible] CC-0. Digitized by eGangotri and MIDF - Delhi [illegible] गाद्विषः ॥ ५ ॥ सेवकश्लोक

[illegible] ॥ सिंहो मृगेन्द्रः पंचास्यो हर्यक्षः केसरी हरिः ॥ शार्दूलद्वीपिनौ व्याघ्रे
तरक्षुस्तु मृगादनः ॥ वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः ॥ दंष्ट्री घोणी स्त
ब्धरोमा क्रोडो भूदार इत्यपि ॥ कपिप्लवंगप्लवगशाखामृगवलीमुखाः ॥ मर्कटो वा
नरः कीशो वनौकाः अथ भल्लुके ॥ ऋक्षाच्छभल्लभालूकाः गंडके खड्गखड्गिनौ ॥
लुलायो महिषो वाहद्विषत्कासरसैरिभाः ॥ स्त्रियां शिवा भूरिमाय गोमा
यु मृगधूर्तकाः ॥ शृगालवंचकक्रोष्टुफेरुफेरवजंबुकाः ॥ ओतुर्विडालो मार्जा
रो वृषदंशक आखुभुक् ॥ त्रयो गोधेरगोधारगोधेया गोधिकात्मजे ॥ श्वावि
त्तु शल्यस्तल्लोम्नि शलली शललं शली ॥ वातप्रमीर्वातमृगः कोकईहामृगो वृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF, Delhi

...गंतातुरवेनकोष्टकः पुंश्च ...दुरः

सिं॰ कः॥ मृगे कुरंगवातायुहरिणाजिनयोनयः॥ ऐणेयमन्याश्चर्माद्यमेणस्यैणमु
७ भे त्रिषु॥ कदली कंदली चीनश्चमूरुप्रियकावपि॥ समूरुश्चेति हरिणा अमी
अजिनयोनयः॥ कृष्णसाररुरुन्यंकुरंकुशंवररौहिषाः॥ गोकर्णपृषतैण
र्ष्यरोहिताश्चमरो मृगाः॥ गंधर्वः शरभो रामः सृमरो गवयः शशः॥ इत्यादयो
मृगेंद्राद्याः गवाद्याः पशुजातयः॥ उंदुरुर्मूषिकोप्याखुर्गिरिका बालमूषि
का॥ कुछुंदरी गंधमुखी दीर्घतुंडी दिवाधकाः॥ सरटः कृकलासः स्यात् मुश
ली गृहगोधिका॥ लूतास्त्री तंतुवायोर्णनाभमर्कटकाः समाः॥ नीलंगुस्तु एमः
कृमिः कर्णजलौकाः शतपद्युभे॥ वृश्चिकः शूककीटः स्यादलिद्रुणौ तु व ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

दिवांधःकौशिको घूको दिवाभीतो निशाटनः
को

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्ट्रिके ॥ पारावतः कलरवकपोतोऽथ शशादनः ॥ पत्री श्येन उलूके तु वायसारा
तिपेचकौ ॥ व्याघ्राटः स्याद् भरद्वाजः खंजरीटस्तु खंजनः ॥ लोहपृष्ठस्तु कंकः
स्यादथ चाषः किकीदिविः ॥ कलिंगभृंगधूम्याटा अथ स्याच्छतपत्रकः ॥ दार्वा
घाटोऽथ सारंगस्तोककश्चातकः समाः ॥ कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायु
धः ॥ चटकः कलविंकः स्यात्तस्य स्त्री चटका तयोः ॥ पुमपत्ये चाटकैरः स्त्र्यपत्ये चट
कैव हि ॥ कर्करेटुः करेटुः स्यात् कृकणक्रकरौ समौ ॥ वनप्रियः परभृतः को
किलः पिक इत्यपि ॥ काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ॥ ध्वांक्षात्मघोषपर
भृद्बलिभुग्वायसा अपि ॥ द्रोणकाकस्तु काकोलो दात्यूहः कालकंठकः ॥ आ

सरवच चिरंजीवी वैकदह हिसमोक्ष लि [illegible]

श्री२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ
१८ तापिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ समौ॥ क्रुङ् क्रौञ्चोऽथ बकः कंकः पुष्कराह्वस्तु
सारसः॥ कोकश्चक्रश्चक्रवाको रथांगाह्वयनामकः॥ कादंबः कलहंसः स्यादुत्क्रो
शकुररौ समौ॥ हंसास्तु श्वेतगरुतश्चक्रांगा मानसौकसः॥ राजहंसास्तु ते चंचु
१८८८ चरणैर्लोहितैः सिताः॥ मलिनैर्मल्लिकाक्षास्ते धार्त्तराष्ट्राः सितेतरैः॥ शरारिरा
टिराडिश्च बलाका बिसकंठिका॥ हंसस्य योषिद्वरटा सारसस्य तु लक्ष्मणा॥
जतूकाजिनपत्रा स्यात्परोष्णी तैलपायिका॥ वर्वणा मक्षिका नीला सरघा मधु अमः
मक्षिका॥ पतंगिका पुत्रिका स्याद्दंशस्तु वनमक्षिका॥ दंशी तज्जातिरल्पा स्या १८
द्गंधोली वरटा द्वयोः॥ भृंगारी झीरिका चीरी झिल्लिका च समा इमाः॥ समौ पतंग

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्त्ल भैरव घोतो ज्योतिरिंगणः॥ मधुव्रतो मधुकरो मधुलिन्मधुपालिनः॥ द्वि
रेफपुष्पलिड्भृंगषट्पदभ्रमरालयः॥ मयूरो वर्हिणो वर्ही नीलकंठो भुजंगभु
क्॥ शिखावलः शिखी केकी मेघनादानुलास्यपि॥ केकावाणी मयूरस्य समौ
चंद्रकमेचकौ॥ शिखा चूडा शिखंडस्तु पिछ्छवर्हे नपुंसके॥ खगे विहंग विह
ग विहंगम विहायसः॥ शकुंति पक्षि शकुनि शकुंत शकुन द्विजाः॥ पतत्रि
पत्रि पतग पतत्पत्ररथांडजाः॥ नगौको वाजि विकिर विविष्किर पतत्रयः॥ नी
डोद्भवा गरुत्मंतः पित्संतो नभसंगमाः॥ तेषां विशेषा हारीतो मद्गुः कारंडवः
प्लवः॥ तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः॥ कोयष्टिकष्टि[illegible]टिभको

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

को

CC-0. Digitized by eGangotri and MIDF- Delhi

खं॰ व ती [illegible] वर्त्तिकाद्यः॥ गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहं॥ स्त्री पक्षतिः पक्षमू
१९ लं चंचुस्त्रोटिरुभे स्त्रियौ॥ प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रिया॥ पेशी
कोशो द्विहीनेंऽडं कुलायो निडमस्त्रियां॥ पोतः पाकोर्भको डिंभः पृथुकः शा
वकः शिशुः॥ स्त्रीपुंसौ मिथुनं द्वंद्वं युग्मं तु युगलं युगं॥ समूहो निवहव्यूहसं
दोहविसरव्रजाः॥ स्तोमौघनिकरव्रातवारसंघातसंचया॥ समुदायः स
मुदयः समवायश्चयो गणः॥ स्त्रियां तु संहतिर्वृंदं निकुरंबं कदंबकं॥ वृंद
भेदाः समैर्वर्गः संघसार्थौ तु जंतुभिः॥ सजातीयैः कुलं यूथं तिरश्चां पुंन राम॰
पुंसकं॥ पशूनां समजोन्येषां समाजोथ सधर्मिणां॥ स्यान्निकायः पुंजरा १९

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शीत्कृत्करः कूटमस्त्रियां॥कापोतशौकमायूरतैत्तिरादीनितद्गणे॥गृहासक्
ताः पक्षिमृगाश्छेकास्तेगृह्यकाश्चते॥४५॥ ॥इतिसिंहादिवर्गः॥ ॥हि॥
मनुष्यामानुषामर्त्यामनुजामानवानराः॥स्युःपुमांसःपञ्चजनाःपुरुषाः
पूरुषानरः॥स्त्रीयोषिदबलायोषानारीसीमन्तिनीवधूः॥प्रतीपदर्शिनी
वामावनितामहिलातथा॥विशेषास्त्वङ्गनाभीरुःकामिनीवामलोचना॥
प्रमदामानिनीकान्ताललनाचनितम्बिनी॥सुन्दरीरमणीरामाकोपनासैव
भामिनी॥वरारोहामत्तकाशिन्युत्तमावरवर्णिनी॥कृताभिषेकामहिषीभो
गिन्याऽन्यानृपस्त्रियः॥पत्नीपाणिगृहीतीचद्वितीयासहधर्मिणी॥भार्याजा

मोऽन्या णिग

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अं. २० याऽथपुंभुम्निदाराःस्यात्तुकुटुंबिनी॥पुरंध्रीसुचरित्रातुसतीःसाध्वीपतिव्र
ता॥कृतसापत्निकाध्यूढाधिविन्नाथस्वयंवरा॥पतिंवराचवर्याथकुल
स्त्रीकुलपालिका॥कन्याकुमारिगौरीतुनग्निकानागतार्तवा॥स्यान्मध्य
६१ माहृष्टरजास्तरुणीःयुवतिःसमे॥समाःस्नुषाजनीवध्वश्चिरंटीतुसुवा
सिनी॥इछावतीकामुकीस्याद्वृषस्यंतीतुकामुकी॥कांतार्थिनीतुयाया
तीसंकेतंसाभिसारिका॥पुंश्चलीधर्षिणीबंधक्यसतीकुलटेत्वरी॥
स्वैरिणीपांशुलाचस्यादशिश्वीशिशुनाविना॥अवीरानिष्पतिसुतावि रामः
श्वस्ताविधवेसमे॥आलिःसखीवयस्याऽथपतिपत्नीसभर्तृकाः॥वृद्धा २०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कृत्रियाः

CC-0. Digitized by eGangotri and MIDF- Delhi

पालिनी॥ प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती॥ शूद्री शूद्रस्य भार्या स्यात् शूद्रा तज्जाति
रेव च॥ आभीरी तु महाशूद्री जातिपुंयोगयोः समा॥ अर्याणी स्वयमर्या
स्यात् क्षत्रिया क्षत्रियाण्यपि॥ उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः॥ आ
चार्यानी तु पुंयोगे स्यादर्या क्षत्रियी तथा॥ उपाध्यायान्युपाध्यायी पोटा
स्त्रीपुंसलक्षणा॥ वीरपत्नी वीरभार्या वीरमाता तु वीरसूः॥ जातापत्या प्र
जाता च प्रसूता च प्रसूतिका॥ स्त्री नग्निका कोटवी स्यात् दूती संचारिके समे॥
कात्यायन्यर्द्धवृद्धा या काषायवसनाधवा॥ सैरंध्री परवेश्मस्था स्ववशा शि
ल्पकारिका॥ असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी॥ वारस्त्री गणिका

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमरः २१

वेश्या रूपाजीवाथ सा जनैः ॥ सत्कृता वारमुख्या स्यात्कुट्टनी शंभली समे ॥ वि
प्रश्निका त्वीक्षणिका दैवज्ञाथ रजस्वला ॥ स्त्रीधर्मिण्यविरात्रेयी मलि
नी पुष्पवत्यपि ॥ ऋतुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्तवं ॥ श्रद्धालुर्दोहद
वती निष्कला विगतार्तवा ॥ आपन्नसत्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी ॥
गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ पुनर्भूर्दिधिषूरूढा द्विस्तस्या
दिधिषुः पतिः ॥ स तु द्विजोग्रेदिधिषुः सैव यस्य कुटुंबिनी ॥ कानीनः कन्य
काजातः सुतोथ सुभगासुतः ॥ सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रि
यः ॥ पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः ॥ सुतौ मातृष्वसुश्चैवं वैमात्रे

अमरः २१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ये विमातृजः॥ अथवांधाकिनेयः स्याद्बंधुलश्चासतीसुतः॥ कौलटेरः कौलटेयो भिक्षुकी तु सती यदी॥
तदा कौलटिनेयोस्याः कौलटेयोपि चात्मजः॥ आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी॥ आ
हुर्दुहितरं सर्वे ऽपत्यं तोकं तयोः समे॥ स्वजाते त्वौरसोरस्यौ तातस्तु जनकः पिता॥ जनयित्री प्र
सूर्माता जननी भगिनी स्वसा॥ ननांदा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा॥ भार्यास्तु भ्रातृवर्गस्य
यातरः स्युः परस्परम्॥ प्रजावती भ्रातृजाया मातुलानी तु मातुली॥ पतिपत्न्योः प्रसूः श्वश्रूः
श्वशुरस्तु पिता तयोः॥ पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः॥ श्यालाः स्युर्भ्रातरः पत्न्याः
स्वामिनो देवृदेवरौ॥ स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः॥ पितामहः पितृपि
ता तत्पिता प्रपितामहः॥ मातुर्मातामहाद्येवं सपिंडास्तु सनाभयः॥ समानोदर्यसोदर्यसग

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ म॰ र्यसहजाःसमाः॥सगोत्रबांधवःज्ञातिबंधुस्वस्वजनाःसमाः॥ज्ञातेयंबंधुतातेषांक्रमाद्भा
२२ वकर्मणोः॥धवःप्रियःपतिर्भर्त्ताजारस्तूपपतिःसमौ॥अमृतेजारजःकुंडोमृतेभ
र्त्तरिगोलकः॥भ्रात्रीयोभ्रातृजोभ्रातृभगिन्यौभ्रातराबुभौ॥मातापितरौपितरौमा
तरपितरौप्रसूर्जनयितारौ॥श्वश्रूश्वशुरौश्वशुरौपुत्रौपुत्रश्चदुहिताच॥दम्पती
जम्पतीजायापतीभार्यापतीचतौ॥गर्भाशयोजरायुःस्यादुल्बंचकललोस्त्रि
याम्॥सूतिमासोवैजननोगर्भोभ्रूणइमौसमौ॥तृतीयाप्रकृतिःषंढःक्लीबः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षंडो नपुंसकं ॥ शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे ॥ स्यात्स्थाविरं तु वृद्धा
त्वं वृद्धसंघेपि वार्द्धकं ॥ पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा ॥ स्यादु
त्तानशया डिंभा स्तनपा च स्तनंधयी ॥ बालस्तु स्यान्माणवको वयस्थस्तरुणो
युवा ॥ प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥ वर्षीयान्दशमी ज्यायान्
पूर्वजस्त्वग्रियोग्रजः ॥ जघन्यजे स्युः कनिष्ठयवीयोवरजानुजाः ॥ अमांसो दु
र्बलश्छातो बलवान्मांसलोंसलः ॥ तुंदिलस्तुंदिकस्तुंदी बृहत्कुक्षिः पिचं
डिलः ॥ अवटीटोवनाटश्चावभ्रटो नतनासिके ॥ केशवः केशिकः केशी व
लिनो वलिभः समौ ॥ विकलांगस्त्वपोगंडः खर्वो ह्रस्वश्च वामनः ॥ खरणाः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF - Delhi

अं॰ स्यात्खरणसो विग्नस्तु गतनासिकः॥ खुरणाः स्यात्खुरणसः प्रज्ञः प्रगत
२२ जानुकः॥ स्यादेडो बधिरः कुब्जे गडुः कुकरे कुणिः॥ पृश्निरल्पतनौ श्रो
णः पंगौ मुंडस्तु मुंडिते॥ वलिर केकरे षोडे खंजस्त्रिषु जरावराः॥ जडुलः का
लकः पिप्लुस्तिलकस्तिलकालकः॥ अनामयं स्यादारोग्यं चिकित्सा रुक्प्रति
क्रिया॥ भेषजौषधभैषज्यान्यगदो जायुरित्यपि॥ स्त्री रुग्रुजा चोपतापरोगव्याधि
गदामयाः॥ क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः॥ स्त्री क्षुत्क्षुतं क्ष
वः पुंसि कासस्तु क्षवथुः पुमान्॥ शोफस्तु श्वयथुः शोथः पादस्फोटो विपादिका॥
किलाससिध्मे कच्छ्वां तु पामपामे विचर्चिका॥ खर्जूः कंडूश्च कंडूया विस्फोटः २२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

+श्लीपदं पादव... ॥११४
CC-0. Digitized by eGangotri and MIDF- Delhi
क्रि २

पिटकः स्त्रियां व्रणोऽस्त्रियामीर्ममरुः क्लीबे नाडीव्रणः पुमान् ॥ कोठो मंडलकं
कुष्ठश्वित्रे दुर्नामकार्शसी ॥ आनाहस्तु निबंधः स्याद्ग्रहणी रुक्प्रवाहिका ॥
प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥ व्याधिभेदा विद्रधिः स्त्री ज्वरमेह
वैद्य भगंदराः ॥ श्लेष्माश्मरी मूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधेस्त्रिषु ॥ रोगहार्यगदंकारो
चि० भिषग्वैद्यौ चिकित्सके ॥ वार्तो निरामयः कल्प उल्लाघो निर्गतो गदात् ॥ ग्ला
नग्लास्नू आमयावी विकृतो व्याधितोऽपटुः ॥ आतुरोऽभ्यमितोऽभ्यांतः समौ पा
मनकच्छुरौ ॥ दद्रुघ्नो दद्रुरोगी स्याद् अर्शोरोगयुतोऽर्शसः ॥ वातकी वातरोगी
स्यात्सातिसारोऽतिसारकी ॥ स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्ष्णि चाप

इ.मी.१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

श्रे॰ मी॥ उन्मत्तउन्मादवती श्लेष्मलः श्लेष्मणः कफी॥ न्युब्जो भुग्ने रुजा वृद्धनाभौ तु
२४ भौ तुंडिलतुंडिभौ॥ किलासिसिध्मलौ अंधे ऽदृग्मूर्छाले मूर्छमूर्छितौ॥ शुक्रं ते
जो रेतसी च बीजवीर्येंद्रियाणि च॥ मायुः पित्तं कफः श्लेष्मा स्त्रियां तु त्वग
सृग्धरा॥ पिशितं तरसं मांसं पललं क्रव्यमामिषं॥ उत्तप्तं शुष्कमांसं स
स्यात्तद्वल्लूरं त्रिलिंगकं॥ रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितं॥ बु
क्काग्रमांसं हृदयं हृत्मेदस्तु वपा वसा॥ पश्चाद्ग्रीवाशिरा मन्या नाडी तु राम:
धमनिः शिरा॥ तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियां॥ अंत्रं पुरी २४
तत् गुल्मः तु प्लीहा पुंस्यथ वस्नसा स्नायुः स्त्रियां कालखंडयकृती तु स

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

१ नासामलं तु सिंघाणं पिञ्जूषः कर्णयोर्मलम् ॥ क्षेपकं १

मेद्रमेः ॥ स्तलिका स्यादिक्षितीताला दूषिका नेत्रयोर्मलं ॥ मूत्रं प्रस्राव उच्चारावस्क
रौ शमलं शकृत् ॥ पुरीषं गूथवर्चस्कमस्त्री विष्ठाविषो स्त्रियौ ॥ स्यात्कर्परः क
पालोस्त्री कीकसं कुल्यमस्थि च ॥ स्याच्छरीरास्थि कंकालः पृष्ठास्थ्नि तु कशे
रुका ॥ शिरोस्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका ॥ अंगं प्रतीकोवयवो
पघनोथ कलेवरं ॥ गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ कायो देहः क्ली
व पुंसोः स्त्रियां मूर्त्तिस्तनुस्तनूः ॥ पादाग्रं प्रपदं पादः पदंघ्रिश्चरणोस्त्रियां ॥
तद्ग्रंथी घुटिके गुल्फौ पुमान्पार्ष्णिरधस्तयोः ॥ जंघा तु प्रसृता जानूरूपर्वा
ष्ठीवदस्त्रियां ॥ सक्थि क्लीवे पुमानूरुस्तत्संधिः पुंसि वंक्षणः ॥ गुदं त्वपानं

घ्रि २

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ २५

पायुर्न्नावस्तिर्न्नाभेरधोद्वयोः॥कटोन्नाश्रोणिफलकंकटिःश्रोणीककुद्मती।
पश्चान्नितंवःस्त्रीकट्याःक्लीवेतुजघनंपुरः॥कूपकौतु[illegible]नितंवस्थौद्वयही
नेकुकुंदरे॥स्त्रियांस्फीचौकटिप्रोथावुपस्थौवक्ष्यमाणयोः॥भगंयोनिर्द्द
योःशिश्नोमेढ्रोमेहनशेफसी॥मुष्कोऽडकोशोवृषणःपृष्टवंशाधरेत्रिकं॥पि
चंडकुक्षीजठरोदरंतुंदंस्तनौकुचौ॥चूचुकंतुकुचाग्रंस्यान्ननाक्रोडंभुजांतरं॥
उरोवत्संचवक्षश्चपृष्टंतुचरमंतनोः॥स्कंधोभुजःशिरोंसोऽस्त्रीसंधीतस्यैव
जत्रुणी॥वाहुमूलेउभौकक्षौपार्श्वमस्त्रीतयोरधः॥मध्यमंचावलग्नंचम
ध्योऽस्त्रीद्वौपरौद्वयोः॥भुजवाहूप्रवेष्टोदोःस्यात्कफोणिस्तुकूर्प्परः॥अस्योपरि

रामः २५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रिप्रगंडः स्यात्प्रकोष्ठस्तस्य चाप्यधः ॥ मणिवंधादाकनिष्ठं करस्य करभो व
हिः ॥ पंचशाषशयः पाणिः तर्जनी स्यात्प्रदेशिनी ॥ अंगुल्यः करशाखाः स्युः
पुंस्यंगुष्ठः प्रदेशिनी ॥ मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ॥ पुन
र्भवः कररुहो नखोस्त्री नखरोस्त्रियां ॥ प्रादेशतालगोकर्णास्तर्जन्यादियुते त
ते ॥ अंगुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुली ॥ पाणौ चपेतप्रतलप्रहस्ता वि
स्तृतांगुलौ ॥ द्वौ संहतौ संहतलप्रतलौ वामदक्षिणौ ॥ पाणिर्निकुब्जः प्रसृ
तिस्तौ युतावंजलिः पुमान् ॥ प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या तु बद्धया ॥ स
रत्निः स्यादरत्निस्तु निःकनिष्ठेन मुष्टिना ॥ व्यामो बाह्वोः सकरयोस्ततयो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रं॰ २६

तिर्य्यगंतरं ।। उर्द्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु ।। कंठो गलोऽथ ग्रीवा-
यां शिरोधिः कंधरेत्यपि ।। कंबुग्रीवा त्रिरेखा सावटुर्घाटा कृकाटिका ।। वक्त्रा-
स्ये वदनं तुंडमाननं लपनं मुखं ।। क्लीबे घ्राणं गंधवहा घोणा नासा च नासि-
का ।। ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।। अधस्ताच्चिबुकं गंडौ कपो-
लौ तत्परो हनुः ।। रदना दशना दंता रदास्तालु तु काकुदं ।। रसज्ञा रसना जि-
ह्वा प्रांतावोष्ठस्य सृक्कणी ।। ललाटमलिकं गोधिरूर्द्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।।
कूर्चमस्त्री भ्रुवोर्मध्यं तारका दृक्कनीनिका ।। लोचनं नयनं नेत्रमीक्ष- राम: २६
णं चक्षुरक्षिणी ।। दृग्दृष्टी चास्रु नेत्रांबु रोदनं चास्रमश्रु च ।। अपांगौ नेत्रयो-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रंतौ कटाक्षोऽपांगदर्शने॥ कर्णशब्दग्रहौ श्रोत्रं श्रुति स्त्री श्रवणं श्रवः॥ उत्तमांगं
शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियां॥ चिकुरः कुंतलो वालः कचः केशः शिरोरु
हः॥ तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुंतलाः॥ ते ललाटे भ्रमरकाः काकपक्षः
शिखंडकः॥ कवरी केशवेशोऽथ धम्मिल्लाः संयताः कचाः॥ शिखा चूडा केशपा
शी व्रतिनस्तु जटा सटा॥ वेणिः प्रवेणी शीर्षण्यशिरस्यौ विशदे कचे॥ पाशः
पक्षश्च हस्तश्च कलापार्थाः कचात्परे॥ तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे॥
आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनं॥ दशैते त्रिष्वलंकर्तालंकरिष्णुश्च
मंडितः॥ प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः॥ विभ्राड्भ्राजिष्णुरोचिष्णू

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अं.
२७

भूषणं स्यादलंक्रिया ॥ अलंकारस्त्वाभरणं परिष्कारो विभूषणं ॥ मंडनं चाथ
मुकुटं किरीटं पुंनपुंसकं ॥ चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ बाल
पाश्या पारितथ्या पत्रपाश्या ललाटिका ॥ कर्णिका तालपत्रं स्यात्कुंडलं कर्ण
वेष्टनं ॥ ग्रैवेयकं कंठभूषा लंबनं स्याल्ललंतिका ॥ स्वर्णैः प्रालंबिकाथोरःसू
त्रिका मौक्तिकैः कृताः ॥ हारो मुक्तावली देवछंदोसौ शतयष्टिकाः ॥ हारभेदा
यष्टिभेदा गुत्सगुत्सार्धगोस्तनाः ॥ अर्धहारो माणवकः एकावल्येकयष्टि
काः ॥ सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥ आवापकः पारिहार्यः कटकं व
लयोस्त्रियां ॥ केयूरमंगदं तुल्ये अंगुलीयकमूर्मिका ॥ साक्षरांगुलिमुद्रा स्यात्कंकणं

एम:
२७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

 तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् । पत्रोर्णं धौतकौशेयं बहुमूल्यं महाधनम् ॥ क्षौमं दुकूलं स्याद्द्वे तु निवीतं प्रावृतं त्रिषु ॥५ मूल
क्षौमं

CC-0. Digitized by eGangotri and MIDP Delhi

करभूषणं ॥ स्त्रीकट्यां मेखला कांची सप्तकी रसना तथा ॥ क्लीबे सारसनं चाऽथ पुं
स्कट्यां शृंखलं त्रिषु ॥ पादांगदं तुलाकोटिर्मंजीरो नूपुरोस्त्रियां ॥ हंसकः पादक
टकः किंकिणी क्षुद्रघंटिका ॥ त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु ॥ वा
ल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् ॥ कौशेयं क्रिमिकोशोत्थं राङ्कवं मृगरो
मजं ॥ अनाहतं निष्प्रवाणि तंत्रकं च नवांबरे ॥ स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्व
स्त्रयोर्द्वयोः ॥ दैर्घ्यमायाम आरोहः परिणाहो विशालता ॥ पटच्चरं जीर्णवस्त्रं स
मौ नक्तककर्पटौ ॥ वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकं ॥ सुचेलकः पटोऽस्त्री स्या
न्वराशिः स्थूलसाटकः ॥ निचोलप्रच्छदपटः समौ रल्लककंबलौ ॥ अंतरीयोपसं[illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अं. व्यानपरिधानान्यधोंसुके॥ द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा॥ संव्यानमुत्तरीयं च चो
२८ लः कूर्पासकोऽस्त्रियां॥ नीशारः स्यात्प्रावरणे हिमानिलनिवारणे॥ अर्द्धोरुके वरस्त्रीणां
स्याच्चंडातकमस्त्रके॥ स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत्॥ अस्त्री वितानमुल्लोचो
दूष्याद्यं वस्त्रवेश्मनि॥ प्रतीसीरा जवनिका स्यात्तिरस्करिणी च सा॥ परिकर्मांगसंस्कारः
स्यान्मार्ष्टिर्मार्जना मृजा॥ उद्वर्तनोत्सादने द्वे समे आप्लाव आप्लवः २४॥ स्नानं चर्चा तु चार्चिक्यं
स्थासकेऽथ प्रबोधनं॥ अनुबोधः पत्रलेखा पत्रांगुलिरिमे समे॥ तमालपत्रतिलकचित्र
काणि विशेषकं॥ द्वितीयं च तुरीयं च न स्त्रियामथ कुंकुमं॥ काश्मीरजन्माग्निशिखं वरं बा राम:
ह्लीकपीतनं॥ रक्तसंकोचपिशुनं धीरं लोहितचंदनं॥ लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रु २८
मामयः॥ लवंगं देवकुसुमं श्रीसंज्ञमथ जायकं॥ कालीयकं च कालानुसार्य्यं चाथ समार्थ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कं॥ वंशिका गुरु राजार्हं लोहं कृमिजजोंगकं॥ कालागुर्वगुरुः स्यात्तु मंगल्या मल्लिगंधियत्॥ यक्ष
धूपः सर्ज्जरसो रालसर्ज्जरसाववपि॥ बहुरूपो ऽथ वृकधूपकृत्रिमधूपकौ॥ तुरुष्कः पिंडकः
सिल्हो यावनो ऽप्यथ पायसः॥ श्रीवासो वृकधूपो ऽपि श्रीवेष्ट सरलद्रवौ॥ मृगनाभिर्मृगमदः क
स्तूरी चाथ कोलकं॥ कक्कोलकं कोलफलमथ कर्पूरमस्त्रियां॥ घनसारश्चंद्रसंज्ञः सिताभ्रो हिम
वालुका॥ गंधसारो मलयजो भद्रश्रीश्चंदनो ऽस्त्रियां॥ तैलपर्णिकगोशीर्षे हरिचंदनमस्त्रियां॥
तिलपर्णी तु पत्रांगं रंजनं रक्तचंदनं॥ कुचंदनं चाथ जातीकोशजातीफले समे॥ कर्पूरागु
रुकस्तूरीकक्कोलैर्यक्षकर्दमः॥ गात्रानुलेपनी वर्त्तिर्वर्णकं स्याद्विलेपनं॥ चूर्णानि वासयो
गाः स्युः भावितं वासितं त्रिषु॥ संस्कारो गंधमाल्याद्यैर्यत्स्यात्तदधिवासनं॥ माल्यं मालास्र
जौ मूर्द्धि्न केशमध्ये तु गर्भकः॥ प्रभ्रष्टकं शिखालंबि पुरोन्यस्तं ललामकं॥ प्रालंबमृजुलंबि स्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

आभोगः २

CC-0. Digitized by eGangotri and MIDF- Delhi

कंठाद्वैकक्षकं तु तत् ॥ यत्तिर्यक्क्षिप्तमुरसि शिखास्वापीडशेखरौ ॥ रचना स्यात्परि-
स्पंदः आभोगः परिपूर्णता ॥ उपधानं तूपबर्हः शय्यायां शयनीयवत् ॥ शयनं मंच-
पर्यंकपल्यंकाः खट्वया समाः ॥ गेंदुकः कंदुको दीपः प्रदीपः पीठमासनं ॥ समुद्गकः
संपुटकः प्रतिग्राहः पतद्ग्रहः ॥ प्रसाधनी कंकतिका पिष्टातः पटवासकः ॥ दर्पणे मुकु-
रादर्शौ व्यजनं तालवृंतकं ॥ १४० ॥ [illegible] ॥ ६ ॥ ॥ संततिर्गोत्रजनन-
कुलान्यभिजनान्वयौ ॥ वंशोऽन्ववायः संतानो वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥ विप्रक्ष-
त्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतं ॥ राजबीजी राजवंश्यो बीज्यस्तु कुलसं-
भवः ॥ महाकुलकुलीनार्यसभ्यसज्जनसाधवः ॥ २ ॥ ॥ ब्रह्मचा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मीमांसकः कौ जैमिनीये वेदान्ती ब्रह्मवादिनि ॥ नैयायिके स्यादौलुक्य सौगतः शून्यवादिनि ॥१॥

[illegible] ॥ विप्रश्च

आत्मगो [illegible] षट्कर्म्मा यागादिनिरतः ॥ विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बु-

धः ॥ धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः । धीमान्सूरिः कृती कृष्टि-

र्लब्धवर्णो विचक्षणः ॥ दूरदर्शी दीर्घदर्शी श्रोत्रियश्छान्दसौ समौ ॥ उपाध्यायोऽध्या-

पकः स्यात्तु निषेकादिकृद्गुरुः ॥ मंत्रव्याख्याकृदाचार्य्य आदेष्टा त्वध्वरे व्रती ॥ यष्टे

नैयायिकस्त्वक्षपादः स्यात्स्याद्वादिक आर्हकः ॥ चार्वाकलौकायतिकौ

सत्कार्ये सांख्यकापिलौ ॥१२॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२

यष्टज्ञमानश्चससोमवतिदीक्षितः॥इज्याशीलोयायजूकोयज्वातुविधिनेष्टवान्॥स
गीष्पतीष्ट्यास्थपतिःसोमपीतीतुसोमपः॥सर्ववेदाःसयेनेष्टोयागःसर्वस्वदक्षिणः॥अ
नूचानःप्रवचनेसांगेधीतीगुरोस्तुयः॥लब्धानुज्ञःसमावृत्तःसुत्वात्वभिषवेकृते। ७१
छात्रांतेवासिनौशिष्येशैक्षाःप्राथमकल्पिकाः॥एकब्रह्मव्रताचारामिथःसब्रह्मचा २०
रिणः॥सतीर्थ्यास्त्वेकगुरवश्चितवानग्निमग्निचित्॥पारंपर्योपदेशेस्यादैतिह्यमिति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

होमयोः ॥ उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वारंभ उपक्रमः ॥ यज्ञः सवोऽध्वरो यागः सप्ततंतु

यज्ञस्य नाम

र्मखः क्रतुः । पाठो होमश्चातिथीनां सपर्यातर्प्पणं बलिः ॥ एतैः पंच महायज्ञा ब्रह्मयज्ञ

ज्ञादिनामकैः । समज्या परिषद्गोष्ठी सभा समिति संसदः ॥ आस्थानी क्लीबमास्थानं स्त्री

नपुंसकयोः सदः । प्राग्वंशः प्राग्घविर्गेहात्सदस्या विधिदर्शिनः ॥ सभासदः सभास्ता

राः सभ्याः सामाजिकाश्च ते । अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ॥ आ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्नीध्राद्याधिष्ण्यैर्वर्ण्याग्नात्विजोपाजनकोष्ठते।वेदिःपरिष्कृताभूमिःसमेस्थण्डिलचत्व
रे।।चषाल्लोयूपकटकः कुम्बासुगहनावृतिः।यूपाग्रंतन्मणिर्म्मन्थ्यदारुणित्वरणि
र्द्वयोः।।दक्षिणाग्निर्गार्हपत्याहवनीयौत्रयोग्नयः।अग्नित्रयमिदंत्रेताप्रणीतःसंस्कृ
तोऽनलः।।समूह्यःपरिचाय्योपचाय्यावग्नौप्रयोगिणः।योगार्हपत्यादानीयदक्षि ३२
णाग्निःप्रणीयते।।तस्मिन्नानाय्योथाग्नायीस्वाहाचहुतभुक्प्रिया।ऋक्सामिधेनी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धाय्याचयास्यादग्निसमिंधने॥गायत्रीप्रमुखंछंदोहव्यपाकेचरुःपुमान्॥आमि
क्षासाशृतोष्णेयाक्षीरेस्याद्दधियोगतः॥धवित्रंव्यजनंतद्यद्रचितंमृगचर्मणा।
पृषदाज्यंसदध्याज्येपरमान्नंतुपायसं॥हव्यकव्येदैवपैत्र्येअन्नेपात्रंस्रुवादिकं॥ध्रु
वोपभृज्जुहूर्नातुस्रुवोभेदाःस्रुचःस्त्रियः॥उपाकृतःपशुरसौयोभिमंत्र्यक्रतौहतः।
परंपराकंशमनंप्रोक्षणंचवधार्थकं॥वाच्यलिंगाःप्रमीतोपसंपन्नप्रोक्षिताहतोसा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्नाज्यंहविरग्नौहुतंत्रिषुवषट्कृतं।दीक्षांतोवभृथोयज्ञः तत्कर्म्मार्हंतुयज्ञि
यं।त्रिष्वथक्रतुकर्म्मेष्टं पूर्त्तंखातादिकर्म्मयत्॥अमृतंविघसोयज्ञःशेषभोजनशे
षयोः।त्यागोविहापितंदानमुत्सर्ज्जनविसर्ज्जने॥विश्राणनंवितरणंस्पर्शनंप्रतिपाद ३२
नं।प्रादेशनंनिर्व्वपनमपवर्ज्जनमंहतिः॥मृतार्थंतदहेदानंत्रिषुस्यादौर्ध्वदेहिकं
।पितृदानंनिवापःस्याच्छ्राद्धंतत्कर्म्मशास्त्रतः॥अन्वाहार्य्यंमासिकेंशोऽष्टमोंऽह्नः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

× आघूर्णिकः आघुणायश्चाभ्युत्थानं तु गौरवम् ॥ ३

कृतपोऽस्त्रियां ॥ पर्य्येषणा परीष्टिश्चान्वेषणा च गवेषणा ॥ सनिस्त्वध्येषणा याच्ञा
भिशस्तिर्याचनार्थना ॥ षट्तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि ॥ क्रमादातिथ्या
तिथेये अतिथ्यर्थेऽत्र साधुनि ॥ स्यादावेशिक आगन्तुरतिथिर्ना गृहागते ॥ पूजा नमस्या
पचितिः सपर्य्यार्चार्हणाः समाः ॥ वरिवस्या तु शुश्रूषा परिचर्य्याप्युपासनं ॥ व्रज्याटा
ट्या पर्य्यटनं चर्य्या त्वीर्य्यापथस्थितिः ॥ उपस्पर्शस्त्वाचमनमथ मौनमभाषणं ॥ आ

× प्राचेतस आदिकविः स्यान्मैत्रावरुणिश्च सः ॥ वाल्मीकश्चाथ गाधेयो विश्वामित्रश्च कौशिकः ॥ व्यासो द्वैपायनः
पाराशर्यः सत्यवतीसुतः ॥ [illegible]श्लोक ॥ १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नुपूर्वीस्त्रियांवावृतपरिपाटीअनुक्रमः॥पर्य्यायश्चातिपातस्तुस्यात्पर्य्ययउपात्य
यः॥नियमोव्रतमस्त्रीतच्चोपवासादिपुण्यकं॥उपवस्तंतूपवासोविवेकःपृथगात्म
ता॥स्याद्ब्रह्मवर्चसंवृत्ताध्ययनर्द्धिरथांजलिः॥पाठेब्रह्मांजलिःपाठेविप्रुषोब्रह्म ३४
बिन्दवः॥ध्यानयोगासनेब्रह्मासनंकल्पेविधिक्रमौ॥मुख्यःस्यात्प्रथमःकल्पोऽनु
कल्पस्तुततोधमः॥संस्कारपूर्वंग्रहणंस्यादुपाकरणंश्रुतेः॥समेतुपादग्रहण

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मभिवादनमित्यपि ॥ भिक्षुः परिव्राट् कर्मन्दी पाराशर्य्यपि मस्करी ॥ तपस्वी तापस
ः पारिकांक्षी वाचंयमो मुनिः ॥ तपःक्लेशसहो दान्तो वर्णिनो ब्रह्मचारिणः ॥ ऋषयः स
त्यवचसः स्नातकस्त्वाप्लुतव्रती ॥ ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥ यः स्थ
ण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ॥ स्थाण्डिलश्चाथ विरजस्तमसः स्युर्द्वयातिगाः
॥ पवित्रः प्रयतः पूतः पाखण्डाः सर्वलिंगिनः ॥ प[illegible]लाशो दण्ड आषाढो व्रते रम्भस्तु

पलाशदण्डस्य नाम [illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तु वैणवः॥ अस्त्रीकमण्डलुः कुण्डी व्रतीनामासनं वृषी। अजिनं चर्म्म कृत्तिः स्त्री त्व

भैक्षं भिक्षाकदम्बकं॥ स्वाध्यायः स्याज्जपः सुत्याभिषवः सवनं च सा। सर्वैनसामपध्वंसि ज

प्यं त्रिषवणमघमर्षणं॥ दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक्। शरीरसाधनापेक्षं नि

त्यं यत्कर्म्म तद्यमः॥ नियमस्तु स यत्कर्म्म नित्यमागन्तुसाधनं। उपवीतं यज्ञसूत्रं प्रोद्धृते ३४

दक्षिणे करे॥ प्राचीनावीतमन्यस्मिन् निवीतं कण्ठलम्बितं। अङ्गुल्यग्रे तीर्थं दैवं स्वल्पा

भद्राकरणं मुण्डनं वपनं त्रिषु॥ २ क्षेपक॥

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुल्योर्मूले कायं मध्येंगुष्ठांगुल्योः पैत्र्यं मूले त्वंगुष्ठस्य ब्राह्मं ॥ स्याद्ब्रह्मभूयं ब्रह्मत्वं
ब्रह्मसायुज्यमित्यपि ॥ देवभूयादिकं तद्वत्कृच्छ्रं सांतपनादिकं । संन्यासवत्यनशने पु
मान्प्रायोथ वीरहा ॥ नष्टाग्निः कुहना लोभान्मिथ्येर्यापथकल्पना । व्रात्यः संस्कारही
नः स्यादस्वाध्यायो निराकृतिः ॥ धर्मध्वजी लिंगवृत्तिरवकीर्णी क्षतव्रतः ॥ सुप्ते यस्मि
न्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥ अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमं । परिवेत्ता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नुजोनूढे ज्येष्ठे दारपरिग्रहात ॥ परिवित्तिस्तु तज्ज्यायान् विवाहोपयमौ समौ ॥ तथा
परिणयोद्वाहोपयामाः पाणिपीडनं ॥ व्यवायो ग्राम्यधर्म्मश्च रतं निधुवनं वसः ॥
त्रिवर्गो धर्म्मकामार्थैश्चतुर्वर्गः समोक्षकैः ॥ सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धाः व २४
रस्य ये ॥ ॥इति ब्रह्मवर्गः॥ ॥मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो वि
राट् ॥ राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥ राजा तु प्रणताशेषसामंतः स्याद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चीश्वरः।चक्रवर्त्ती सार्वभौमो नृपोन्यो मण्डलेश्वरः॥येनेष्टं राजसूयेन मण्डलस्येश्व
रश्च यः।शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकं॥राजन्यकं च नृपतिक्षत्रियाणां गणे
क्रमात॥मंत्री धीसचिवोऽमात्योन्ये कर्म्मसचिवास्ततः॥महामात्राः प्रधानानि पुरोधास्तु
पुरोहितः।द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ॥प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थि
तदर्शकाः।रक्षिवर्गस्त्वनीकस्थोऽध्यक्षाधिकृतौ समौ॥स्थायुकोऽधिकृतो ग्रामे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोपोग्रामेषुभूरिषु।भौरिकःकनकाध्यक्षोरूप्याध्यक्षस्तुनैष्किकः॥अंतःपुरेत्व
धिकृतःस्यादंतर्वंशिकोजनः।सौविदल्लाःकंचुकिनःस्थापत्याःसौविदाश्चते॥षंढो
वर्षवरस्तुल्यौःसेवकार्थ्यनुजीविनः।विषयानंतरोराजाशत्रुर्मित्रमतःपरं॥उदासी २८
वयस्यानाम
नःपरतरःपार्ष्णिग्राहस्तुपृष्ठतः।रिपौवैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः॥द्विड्विपक्षा
हिताभित्रदस्युशात्रवशत्रवः।अभि[illegible]निघातिपरारातिप्रत्यर्थिपरिपंथिनः॥वयस्यःस्नि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्धः सवया अथमित्रं सखा सुहृत् ।सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्त्तनं ॥यथा
र्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ।चारश्च गूढपुरुषश्चाप्तप्रत्ययितस्त्रिषु ॥सांवत्स
रो ज्योतिषिको दैवज्ञगणकावपि ।स्युर्मौहूर्तिकमौहूर्त्तज्ञानिकार्त्तान्तिका अपि ॥तांत्रि
को ज्ञातसिद्धांतः शत्री गृहपतिः समौ ।लिपिकारोऽक्षरचणोऽक्षरचंचुश्च लेखके ॥लि
खिताक्षरसंस्थाने लिपिर्लिबिरुभे स्त्रियौ ।स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्म्मणि ॥अ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्वनीनो ध्वगो ध्वन्यः पांथः पथिक इत्यपि ॥ स्वाम्यमात्याः सुहृत्कोषो राष्ट्रदुर्गवला
नि च ॥ राज्यांगानि प्रकृतयः पौराणां श्रेणयो पि च ॥ संधिर्नाविग्रहो यानमासनं द्वै
धमाश्रयः ॥ षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमंत्रजाः ॥ क्षयस्थानं च वृद्धिश्च २५
त्रिवर्गो नीतिवेदिनां ॥ स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजं ॥ भेदो दण्डः साम दान
मित्युपायचतुष्टयं ॥ साहसं तु दमो दण्डः साम सांत्वमथो समौ ॥ भेदोपजापावुपधा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चमध्यैर्जल्परीक्षणां॥पंचविंशब्धषड्क्षीणोयस्तृतीयाद्यगोचरः।विविक्तविजनछ
न्ननिःशलाकास्तथारहः॥रहश्चोपांशुचालिंगेरहस्यंतद्भवेत्रिषु।समौविस्रंभ
विश्वासौभ्रेषोभ्रंशोयथोचितात्॥अभ्रेषन्यायकल्पास्तुदेशरूपंसमंजसं।युक्त
मौपयिकंलभ्यंभजमानाभिनीतवत्॥न्याय्यंचत्रिषुषट्संप्रधारणातुसमर्थनं
।अपवादस्तुनिर्देशोनिदेशःशासनंचसः॥शिष्टिश्चाज्ञाचसंस्थातुमर्यादाधार

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ स्थितिः। आगोऽपराधो मंतुश्च समे तूद्दानबंधने॥ द्विपाद्यं द्विगुणो दंडो भागधे
यः करो बलिः। घट्टादिदेयं शुल्कोऽस्त्री प्राभृतं तु प्रदेशनं॥ उपायनमुपग्राह्यमु
पहारस्तथोपदा॥ यौतकादि तु यद्देयं सुदायो हरणं च तत्॥ तत्कालस्तु तदात्वं स्या
दुत्तरः काल आयतिः॥ सांदृष्टिकं फलं सद्यः उदर्कः फलमुत्तरं॥ अदृष्टं वह्नितोया २८
दि दृष्टं स्वपरचक्रजं॥ महीभुजामहिभयं स्वपक्षप्रभवं भयं॥ प्रक्रिया त्वधिकारः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्याच्चामरंतुप्रकीर्णकं।नृपासनंयत्तद्भद्रासनंसिंहासनंचतत्॥हैमंछत्रंत्वातप
त्रंराज्ञस्तुनृपलक्ष्मतत्।भद्रकुंभःपूर्णकुंभोभृंगारःकनकालुका॥निवेशःशि
बिरंषंढेसज्जनंतूपरक्षणं।हस्त्यश्वरथपादातं[redacted]सेनांगंस्याच्चतुष्टयं॥दंतीदंता
वलोहस्तीद्विरदोनेकपोद्विप॥मतंगजोगजोनागःकुंजरोवारणःकरी॥इभस्तंबे
रमःपद्मीयूथनाथस्तुयूथपः॥मदोत्कटोमदकलःकलभःकरिशावकः॥प्रभि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्नोगर्द्धितोमत्तःसमावुद्वांतनिर्म्मदौ॥हास्तीकंगजतावृंदेकरिणीधेनुकावशा॥ग
ण्डःकटोमदोदानंवमथुःकरशीकरः॥कुंभौतुपिंडौशिरसस्तयोर्म्मध्येविदुःपुमा
नाअवग्रहोललाटंस्यादीषिकात्वक्षिकूटकं॥अपांगदेशोनिर्य्याणंकर्णमूलंतुचू ४०
लिका।अधःकुंभस्यवाहित्थंप्रतिमानमधोस्ययत्॥आसनंस्कंधदेशःस्यात्पद्मकंवि
न्दुजालकं।पक्षभागःपार्श्वभागोदंतभागस्तुयोग्रतः॥द्वौपूर्वपश्चाज्जंघादिदेशौगा ३९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रावरैःक्रमात ॥ तेष्वेकैकस्यक्रमात्तानंबंधस्तंभेथशृंखले ॥ अंदुकोनिगडोस्त्रीस्याद
कुशोस्त्रीशृणिर्द्वयोः ॥ दूष्याकक्ष्यावरत्रास्यात्कल्पनासज्जनासमे ॥ प्रवेण्यास्तरणंव
र्णःपरिस्तोमःकुथोद्वयोः ॥ वीतंत्वसारंहस्त्यश्वंवारीतुगजबंधनी ॥ घोटकेपीतितु
रगतुरंगाश्वतुरंगमाः ॥ वाजिवाहार्वगंधर्वहयसैंधवसप्तयः ॥ आजानेयाःकुली
नाःस्युर्विनीताःसाधुवाहिनः ॥ वनायुजाःपारसीकाःकांबोजाबाह्लिकाहयाः ॥ ययु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रश्वोश्वमेधीयोजवनस्तुजवाधिकः।पृष्ठ्यःस्थौरीश्वितःकर्कोरथ्योवोढारथस्य
यः॥बालःकिशोरोवाम्यश्वावडवावाडवंगणे।त्रिष्वाश्वीनंयदश्वेनदिनेनैकेनग
म्यते॥कश्यंतुमध्यमश्वानांहेषाह्रेषाचनिःस्वनः।निगालस्तुगलोद्देशोवन्देत्वश्वी
यमाश्ववत्॥आस्कंदितंधौरितकंरेचितंवल्गितंप्लुतं।गतयोमूःपंचधाराघोणा
तुप्रोथमस्त्रियां॥कविकातुखलीनोस्त्रीशफंक्लीबेखुरःपुमान्।पुछोस्त्रीलूम ४१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

लूमलांगूलेबाल्हस्तश्चबाल[illegible]धिः॥त्रिषूपवृत्तलुठितौपरावृत्तेमुहुर्भु

वि॥यानंचक्रिणियुद्धार्थेशतांगःस्यंदनोरथः॥असौपुष्यरथश्चक्रयानंनसमरा

यपत्॥कर्णीरथःप्रवहणंडयनंचसमंत्रयं॥क्लीवेनःशकटोस्त्रीस्याद्गंत्रीकंवलिवा

ह्यकं॥शिविकायाप्ययानंस्याद्दोलाप्रेंखादिकास्त्रियां॥उभौतुद्वैपवैयाघ्रौद्वी

पिचर्मावृतेरथे॥पांडुकम्बलसंवीतःस्यंदनःपांडुकम्बली॥रथेकाम्बलवास्त्रा

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धाः कंबलादिभिरावृते ॥ [redacted] ॥ त्रिषु द्वैपादयो रथ्या रथक
ट्या रथव्रजे ॥ धूः स्त्री क्लीबे यानमुखं स्याद्रथांगमपस्करः ॥ चक्रं रथांगं तस्यांते ने
मिः स्त्री स्यात्प्रधिः पुमान् ॥ पिण्डिका नाभिरक्षाग्रकीलके तु द्वयोरणिः ॥ रथगुप्ति ५२
र्वरूथो ना कूबरस्तु युगंधरः ॥ अनुकर्षो दार्वधःस्थं प्रासंगो ना युगाद्युगः ॥ सर्वं
स्याद्वाहनं यानं युग्यं पत्रं च धोरणं ॥ परंपरावाहनं यत्तद्वैनीतकमस्त्रियां ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ॥ नियंता प्राजिता यंता सूतः क्षत्ता च
सारथिः ॥ सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुंबिनः ॥ रथिनः स्यंदनारोहा अश्वारो
हास्तु सादिनः ॥ भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः ॥ सेनायां समवेता ये
सैन्यास्ते सैनिकाश्च ते ॥ वलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः ॥ परिधिस्थः परि
चरः सेनानीर्वाहिनीपतिः ॥ कंचुको वारवाणोऽस्त्री यत्तु मध्ये सकंचुकाः ॥ बध्नंति तत्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रसनमधिकांगोथशीर्षकं॥शीर्षण्यंचशिरस्त्रेथतनुत्रंवर्मदंशनं॥उरश्छदःकंक
टकोजगरःकवचोस्त्रियां॥आमुक्तःप्रतिमुक्तश्चपिनद्धश्चापिनद्धवत्॥सन्नद्धोवर्मि
तःसज्जोदंशितोव्यूढकंकटः॥त्रिष्वामुक्तादयोवर्मभृतांकावचिकंगणे॥पदातिपत्ति
पदगपादातिकपदाजयः॥पद्गश्चपदिकश्चाथपादातंपत्तिसंहतिः॥शस्त्राजीवेका ४२
ण्डस्पृष्टायुधीयायुधिकाःसमाः॥कृतहस्तःसुप्रयोगविशिखःकृतपुंखवत्॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपराद्धपृषत्कोसौल्लक्षाद्यश्च्युतशायकः।धन्वीधनुष्मान्धानुष्कोनिषंग्यस्त्री
धनुर्द्धरः॥स्यात्काण्डवांस्तुकाण्डीरः शाक्तीकः शक्तिहेतिकः।याष्टीकपारश्वधि
कौयष्टिपरश्वधहेतिकौ॥नैस्त्रिंशिकोसिहेतिः स्यात्समौप्रासिककौंतिकौ॥चर्मीफल
कपाणिः स्यात्पताकीवैजयंतिकः॥अनुप्लवः सहायश्चानुचरोभिसरः समाः।पुरो
गाग्रेसरप्रष्ठाग्रतःसरपुरःसराः॥पुरोगमःपुरोगामीमंदगामीतुमंथरः।जंघा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोतिजवस्तुल्यौजंघाकरिकजांघिकौ।तरस्वीत्वरितोवेगीप्रजवीजवनोजवः
॥जय्योयःशक्यतेजेतुंजेयोजेतव्यमात्रके जैत्रस्तुजेतायोगछत्यलंविद्विषतःप्र
ति॥सोभ्यमित्रोभ्यमित्रीयोप्यभ्यमित्रीणइत्यपि॥ऊर्जस्वलःस्यादूर्जस्वीयऊर्जातिश
यान्वितः॥स्यादुरस्वानुरसिलोरथिकोरथिनोरथी।कामंगाम्यनुकामीनोह्यत्यंती
नस्तथाभृशं॥शूरोवीरश्चविक्रांतोजेताजिष्णुश्चजित्वरः॥सांयुगीनोरणेसाधुः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शस्त्राजीवादयस्त्रिषु ॥ ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः । वरूधिनी वलं
सैन्यं चक्रं चानीकमस्त्रियां ॥ व्यूहस्तु वलविन्यासो भेदा दंडादयो युधि । प्रत्यासारो
व्यूहपार्ष्णिः सैन्यपृष्ठे प्रतिग्रहः ॥ एकेभैकरथा त्र्यश्वा पत्तिः पंचपदातिका । पत्त्यंगै
स्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं ॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
अनीकिनी दशानीकिन्यक्षौहिण्यथ संपदि ॥ संपत्तिः श्रीश्च लक्ष्मीश्च विपत्त्यां विप

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दापदौ। आयुधंतुप्रहरणंशस्त्रमस्त्रमथास्त्रियौ॥ धनुश्चापौधन्वशरासनकोद
ण्डकार्म्मुकः। इष्वासोप्यथकर्णस्यकालपृष्ठंसरासनं॥ कपिध्वजस्यगाण्डीवगांडि
श्री वौपुंनपुंसके। कोटिरस्याटनीगोधातलेज्याघातवारणे॥ लस्तकस्तुधनुर्म्मध्यंमौ
र्वीज्यासिंजिनीगुणः। स्यात्प्रत्यालीढमालीढमित्यादिस्थानपंचकं॥ लक्ष्यंलक्षंशर
व्यंचशराभ्यासउपासनं। पृषत्कबाणविशिखाअजिह्मगखगाशुगाः। कलम्बमा ४४
खगाशुगाः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गखाशुगाः पत्रीरोपइषुर्द्वयोः।प्रक्ष्वेडनास्तुनाराचाःपक्षोवाजस्त्रिषूत्तरे॥निरस्तः
प्रहितेवाणेविषाक्तेदिग्धलिप्तकौ।तूणोपासंगतूणीरनिषंगाइषुधिर्द्वयोः॥तूण्यां
खड्गेतुनिस्त्रिंशचन्द्रहासासिरिष्टयः।कौक्षेयकोमण्डलाग्रःकरवालःकृपाणवत्॥
त्सरुःखड्गादिमुष्टौस्यान्मेखलातन्निबधनं।फलकोस्त्रीफलंचर्मसंग्राहोमुष्टिरस्य
यः॥द्रुघणोमुद्गरघणौस्यादीलीकरपालिका।भिंदिपालःसृगस्तुल्यौपरिघःप

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रिघातनः॥ द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः। स्याच्छस्त्री चासिपुत्री च छु
रिकाचासिधेनुका॥ वा पुंसि शल्यं शंकुर्ना सर्वला तोमरोऽस्त्रियां। प्रासस्तु कुंतः को
णस्तु स्त्रियः पाल्यश्रिकोटयः॥ सर्वाभिसारः सर्वौघः सर्वसंनहनार्थकः॥ लोहाभि ४५
सारोऽस्त्रभृतां राज्ञां नीराजनाविधिः॥ यत्सेनयाभिगमनमरौ तदभिषेणनं॥ या
त्रा व्रज्याभिनिर्यानं प्रस्थानं गमनं गमः॥ स्यादासारः प्रश रणी प्रचक्रं चलिता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

र्षकां। अहितान्प्रत्यभीतस्य रणे यानमभिक्रमः। वैतालिका बोधकराश्चाक्रिका
घांटिकार्थकाः। स्युर्मागधास्तु मगधा बंदिनस्तुतिपाठकाः। संशप्तकास्तु समया
त्संग्रामादनिवर्तिनः। रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः। चूर्णे क्षोदः स
मुत्पिंजपिंजलौ भृशमाकुले। पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियां। सावी
राशंसनं युद्धभूमिर्याति भयप्रदा। अहंपूर्वमहंपूर्वमित्यहंपू र्विका स्त्रियां। आ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

होपुरुषिकादर्प्पाद्यास्यात्संभावनात्मनि ।। अहमहमिकातुसास्यात्परस्परंयो
भवत्यहंकारः ।। द्रविणंतरःसहोबलशौर्य्याणिस्थामशुष्मंच ।। शक्तिःपराक्रमःप्रा
णोविक्रमस्त्वतिशक्तिता ।। वीरपाणंतुयत्पानंवृत्तेभाविनिवारणे ।। युद्धमायोधनंज
न्यंप्रधनंप्रविदारणं ।। मृधमास्कंदनंसंख्यंसमीकंसाम्परायिकं ।। अस्त्रियांसमरा ४६
नीकरणाःकलहविग्रहौ ।। संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः ।। अभ्याम

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

र्द्दसमाघातसंग्रामाभ्यागमाहवाः ॥ समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः ।
नियुद्धं बाहुयुद्धे स्यात्तुमुलं रणसंकुले । क्ष्वेडा तु सिंहनादः स्यात्करिणां घटना घ
टा ॥ क्रंदनं योधसंरावो बृंहितं करिगर्जितं ॥ विस्फारो धनुषः स्वानः पटहाडम्बरौ
समौ । प्रसभं तु बलात्कारो हठोथ स्खलितं छलं ॥ अजन्यं क्लीवमुत्पात उपसर्गः स ४
मं त्रयं । मूर्छा तु कश्मलं मोहोप्यवमर्द्दस्तु पीडनं ॥ अभ्यवस्कंदनं त्वभ्यासादनं वि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयोजन्यः । वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ॥ प्रद्रावोद्द्रावसंद्रावसंदावा वि
द्रवो द्रवः । अपक्रमोपयानं च रणो भंगः पराजयः ॥ पराजितपराभूतौ त्रिषु नष्ट
तिरोहितौ । प्रमापणं निवर्हणं निकारणं विशारणं ॥ प्रवासनं परासनं निसूदनं नि ५६
हिंसनं । निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनं ॥ निस्तर्हणं निहननं क्षणनं परि
वर्ज्जनं । निर्वापणं विशसनं मारणं प्रतिघातनं ॥ उद्वासनप्रमथनक्रथनोज्जा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सनानि च । आलंभपिंजविशरघातोन्माथवधावपि ॥ स्यात्पंचता कालधर्मो दि
ष्टांतः प्रलयोत्ययः । अंतो नाशो द्वयोर्मृत्युर्मरणं निधनोस्त्रियां ॥ परासुःप्रा
प्तपंचत्वपरेतप्रेतसंस्थिताः । मृतप्रमीतौ त्रिष्वेते चिता चित्या चितिः स्त्रियां ॥
कबंधोस्त्री क्रियायुक्तमपमूर्धकलेवरं । श्मशानं स्यात्पितृवनं कुणपः शवमस्त्रि
यां ॥ प्रग्रहोपग्रहौ वंद्यां कारा स्याद्बंधनालये । पुंसि भूम्न्यसवः प्राणाश्चैवं जीवो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुधारसं॥ आयुर्जीवितकालो ना जीवातुर्जीवितौषधं॥ इति क्षत्रियवर्गः
ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः। आजीवो जीविका वार्ता वृत्तिर्वर्त्तनजी
४८ वने॥ स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः। सेवा श्ववृत्तिरनृतं कृषिरुंछ
शिलं त्वृतं॥ द्वे याचितायाचितयोर्यथासंख्यं मृतामृते। सत्यानृतं वणिग्भावः स्या
दृणं पर्युदंचनं॥ उद्धारोऽर्थप्रयोगस्तु कुशीदं वृद्धिजीविका। याञ्चयाप्तं याचितकं ४८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निमयादापनिस्यकं ।।उत्तमर्णाजमर्णौ द्वौ प्रयोक्तृमाहुकौ नमात्र ।कुशीदिनोवार्द्धु
षिकोवृध्याजीवस्तुवार्द्धुषिः ।।दोषजीवः कर्षकश्चकृषिकश्चकपीबलः ।।दोस्त्रं वृ
फेयशान्तेयं ब्रीहिशान्तु ड़वौ चित ।।यव्यं अवकं यष्टिक्यं षनादिनवनं स्तितरां ति
ल्यतैल्लीनवन्माषोनाणु नंगाढिकरु पता ।।मौद्गीनं कौदवीणादि शेषश्चान्योद्भव दं
मं वीजाकृतं तत्पलकृष्टेसी त्यं कषं अफल्यवत ।।त्रिगुणाकृतं तत्तीयाकृतं त्रिहल्यं
१ शाकक्षेत्रादिके शाकशाकटं शाकशाकिनम् ।।श्लो १२।।१२४।।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिसीत्यमपितस्मिन् ।द्विगुणाकृतेतुसर्वंपूर्वंसंवाकृतमपीह ॥द्रोणाढकादिवापादौ
द्रौणिकाढकिकादयः ।खारीवापस्तुखारीकउत्तमर्णादयस्त्रिषु ॥पुंनपुंसकयोर्वप्रः
केदारःक्षेत्रमस्यतु ।कैदारकंस्यात्कैदार्यंक्षैत्रंकैदारिकंगणे ॥लोष्टानिलेष्टवःपुंसि
कोटिशोलोष्टभेदनः ।प्राजनंतोदनंतोत्रंखनित्रमवदारणे ॥दात्रंलवित्रमाबंधो ४९
योत्रंयोक्त्रमथोफलं ।निरीशंकुटकंफालःकृषिकोलांगलंहलं ॥गोदारणंचसीर

मूलयानाम

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सीतानाम लाङ्गलेन कृतारेखा

स्वशम्यास्त्रीयुगकीलकः ईशालांगलदण्डः स्यात्सीतालांगलपद्धतिः ॥ पुंसिमेधिः
खले दारु न्यस्तं यत्पशुबंधने ॥ आशुर्व्रीहिः पाटलः स्यात्सितशूकयवौ समौ ॥ तोक्म
स्तु तत्र हरिते कलायस्तु सतीनकः ॥ हरेणुखण्डिकौ चास्मिन् कोरदूषस्तु कोद्रवः ॥
मंगल्यको मसूरोथ मकुष्टकमयुष्टकौ ॥ वनमुद्गे सर्षपे तु द्वौ तंतुभकदम्बकौ ॥
सिद्धार्थस्त्वेष धवलो गोधूमः सुमनः समौ ॥ स्याद्यावकस्तु कुल्माषश्चणको ह

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रिमंथजः ॥ द्वौ तिलो तिलपेजश्च तिलपिंजश्च निष्फले । क्षवः क्षुधाभिजननो राजि
काकृष्णिकासुरी ॥ स्त्रियौ कंगुप्रियंगू द्वे अतसी स्यादुमा क्षुमा । मातुलानी तु भंगा
यां व्रीहिभेदस्त्वणुः पुमान् ॥ किंशारुः शस्यशूकं स्यात्कणिशं शस्यमंजरी । धा
न्यं व्रीहिः स्तंबकरिः स्तंबो गुत्सस्तृणादिनः ॥ नाडी नालस्य काण्डोस्य पलालोस्त्री ५०
स निष्फलः । कडंगरो बुसं क्लीबे धान्यत्वचि तुषः पुमान् ॥ शूकोस्त्री श्लक्ष्णती

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दनागेशमी शम्बा त्रिषूत्तरे । ऋद्धमावसितं धान्यं पूतं तु बहुलीकृतं ।। माषादयः
समीधान्ये शूकधान्ये यवादयः । शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी
। तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुका । अयोग्रं मुशलोऽस्त्री स्यादुदूखल
लमुलूखलं ।। प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान् । स्यूतप्रसेवौ कण्डो
लपिटौ कटकिलिंजकौ ।। समानौ रसवत्यां तु पाकस्थानमहानसे । पौरोगवस्तद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्यक्षोसूपकारास्तु बल्लवाः। आरालिकास्त्वांधसिकाः सूदा औदनिका गुणाः॥ आ
पूपिकः कांदविको भक्ष्यकार इमे त्रिषु। अश्मंतमुद्धानमधिश्रयणी चुल्लिरंतिका
॥ अंगारधानिकांगारशकट्यपि हसंत्यपि। हसन्यप्यथ न स्त्री स्यादंगारोलातमु
ल्मुकं॥ क्लीबे म्बरीषं भ्राष्ट्रो नाकंदुर्वा स्वेदनी स्त्रियां॥ अलिंजरः स्यान्मणिकं कर्क
र्यालुर्गलंतिका। पिठरः स्थाल्युखा कुण्डं कलशस्तु त्रिषु द्वयोः॥ घटः कुटनि ५१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पा
वीवल्लीसरावोवर्द्धमानकः। ऋजीषंपिष्टपचनंकंसोऽस्त्रीपानभाजनं॥ कुतूःकृ
तेस्नेहपात्रंसैवाल्पाकुतुपःपुमान्। सर्वमावपनंभाण्डंपात्रामत्रंचभाजनं॥ दर्विः
कंबिःखजाकाचस्यात्तर्द्दूर्दारुहस्तकः। अस्त्रीशाकंहरितकंशिग्रुरस्यतुनाडिका॥
